हेमचन्द्रः ॥ (यथा, मुग्धबोधे कारकप्रकरणे। ५ सूत्रम् ।
"रक्षांस्यखादयदनाययदूर्द्ध्वलोक-
माक्रन्दयत्कपिभिराव्ययदाशु रामः" ॥)

ऊर्द्ध्वस्थः, त्रि, (ऊर्द्ध्वे तिष्ठति यः। ऊर्द्ध्व+स्था+क।) उपरिस्थितः। तत्पर्य्यायः। ऊर्द्ध्वन्दमः २। इति त्रिकाण्डशेषः॥

ऊर्द्ध्वस्थितिः, स्त्री, (ऊर्द्ध्वा स्थितिर्यत्र।) ऊर्द्ध्वावक्तः। स तु अश्वस्य पृष्ठस्थानम्। तत्पर्य्यायः। पुरुषकम् २। इति त्रिकाण्डशेषः। उपरिस्थितिः। उपरिस्थानम् ॥

ऊर्द्ध्वासितः, पुं, (ऊर्द्ध्वे आसितः।) कारवेल्लः। इति त्रिकाण्डशेषः॥ करला इति भाषा॥

ऊर्म्मिः, स्त्री, पुं, (ऋच्छतीति। ऋ गतौ। "अर्त्तेरूच्च" । ४। ४४। इति उणादिसूत्रेण मिः। अर्त्तेरुरादेशश्च ॥) तरङ्गः। (यथा, रघुः।१२। ८५।
"तमाधूतध्वजपटं व्योमगङ्गोर्म्मिवायुभिः" ॥)
प्रकाशः। वेगः। भङ्गः। वस्त्रसङ्कोचरेखा। वेदना। पीड़ा। इति मेदिनी ॥ उत्कण्ठा। इति हेमचन्द्रः॥ "शोकमोहौ जरामृत्यू क्षुत्पिपासे षडूर्म्मयः"। इति श्रीभागवतटीका॥
(बुभुक्षादयः षट्, यथा ;—
"बुभुक्षा च पिपासा च प्राणस्य मनसः स्मृतौ।
शोकमोहौ शरीरस्य जरामृत्यू षडूर्म्मयः" ॥
(अश्वगतिभेदः। तल्लक्षणं यथा वैजयन्त्याम्।
"सङ्कोचितानामश्वानां नमनोन्नमनाकृतिः।
अतिवेगसमायुक्ता गतिरूर्म्मिरुदाहृता" ॥
तथा च माघे ५। ४।
"तूर्णं पयोधर इवोर्म्मिभिरापतन्तः" ॥)

ऊर्म्मिका, स्त्री, (ऊर्म्मिरिव। इवे प्रतिकृताविति कन्। ऊर्म्मिं प्रकाशं कायतीति वा। आतोनुपेति कः।) उत्कण्ठा। भृङ्गनादः। वस्त्रभङ्गः। अङ्गुलीयकम्। वीचिः। इति हेमचन्द्रः॥

ऊर्म्मिमान्, [त्] त्रि, (ऊर्म्मिरस्यास्तीति। ऊर्म्मि+मतुप्।) वक्रः। इत्यमरः॥ ढेउखेलानिया इति भाषा। तरङ्गयुक्तः॥ (यथा, महाभारते २। द्रौपदीप्रश्ने ६३। २८।
"दीर्घेषु नीलेष्वथ चोर्म्मिमत्सु
जग्राह केशेषु नरेन्द्रपत्नीम्" ॥)

ऊर्म्मिमाली, [न्] पुं, (ऊर्म्मीणां माला विद्यतेऽस्य। इनिः।) समुद्रः। इति त्रिकाण्डशेषः॥ ("चन्द्रं प्रवृद्धोर्म्मिरिवोर्म्मिमाली"। इति रघुः ५। ६१।)

ऊर्व्वरा, स्त्री, उर्व्वरा। सर्व्वशस्याढ्या भूमी। इति शब्दरत्नावली। (व्युत्पत्तिस्तु क्रमादौ उर्व्वराशब्दे द्रष्टव्या।)

ऊर्व्वशी, स्त्री, (ऊरूमश्नुते स्वकारणत्वेन व्याप्नोति या। ऊरु+अश्+अच्+ङीप्। नारायणोरुसम्भवत्वात् तथात्वम्।) उर्व्वशी। स्वर्गवेश्याविशेषः। इत्यमरटीकायां रायमुकुटः॥ (विस्तृतिस्तु क्रमादौ उर्व्वशीशब्दे द्रष्टव्या।)

ऊर्व्वसी, स्त्री, (ऊरौ उषिता इति। पृषोदरादित्वात् साधुः।) उर्व्वशी। इत्यमरटीकासारसुन्दरी।

ऊर्व्वङ्गं, क्ली, (ऊर्व्याः पृथिव्या अङ्गमिव।) गोमयच्छत्रिका। तत्पर्य्यायः। दिलीरम् २ शिलीन्ध्रकम् ३ वशारोहम् ४ गोलासम् ५। इति हारावली॥

ऊर्षा, स्त्री, देवताड़कतृणम्। इति शब्दचन्द्रिका॥

ऊलुपी, [न्] पुं, उलुपी। शिशुमारः। इत्यमरटीकासारसुन्दरी॥ (जलजन्तुविशेषः॥)

ऊलूकः, पुं, (उलुकशब्देऽस्य व्युत्पत्तिर्द्रष्टव्या।) उलुकः पेचकः। इत्यमरटीकायां रायमुकुटः॥
(यथा, पञ्चतन्त्रे ३। ७७।
"ऊलूकं नृपतिं कृत्वा का नः सिद्धिर्भविष्यति" ॥)

ऊष रोगे। इति कविकल्पद्रुमः॥ (भ्वादिं-परं-सकं-सेट्।) दीर्घादिः। "ऊषति सन्तं खलः"। इति दुर्गादासः॥

ऊषं, क्ली, (ऊष्+क।) प्रभातम्। इति शब्दरत्नावली॥

ऊषः, पुं, क्षारमृत्तिका। इत्यमरः॥
(यथा मनुः ५। १२०।
"कौषेयाविकयोरूषैः कुतपानामरिष्टकैः"।
"ऊषैः क्षारमृत्तिकाभिः" इति कुल्लुभट्टः।
कर्णविलम्। चन्दनाद्रिः।)

ऊषकं, क्ली, (ऊष+स्वार्थे कन्।) प्रत्यूषम्। इति शब्दरत्नावली।

ऊषणं, क्ली, (ऊष्+ल्युट्।) मरिचम्। इति हेमचन्द्रः॥ (मरिचार्थे पर्य्यायो यथा,—
"मरिचं वेल्लजं कृष्णमूषणं धर्म्मपत्तनम्" ॥
गुणाश्चास्य मरिचशब्दे ज्ञेयाः॥ शुण्ठी च। एतदर्थे पर्य्यायो यथा,—
"शुण्ठी विश्वा च विश्वञ्च नागरं विश्वभेषजम्।
ऊषणं कटुभद्रञ्च शृङ्गवेरं महौषधम्" ॥
गुणाश्च शुण्ठीशब्दे ज्ञातव्याः॥ पिप्पलीमूलञ्च। एतदर्थे पर्य्यायो यथा,—
"ग्रन्थिकं पिप्पलीमूलमूषणं चटकाशिरः"।
अस्य गुणाश्च पिप्पलीमूलशब्दे बोद्धव्याः। इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

ऊषणा, स्त्री, उषणा। पिप्पली। इति शब्दरत्नावली॥ (चविका। अस्याः पर्य्यायो यथा,—
"भवेच्चव्यन्तु चविका कथिता सा तथोषणा"।
गुणाश्चास्याश्चविकाशब्दे बोध्याः। इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

ऊषरः, त्रि, (ऊष+र।) क्षारभूमी। लोणा जायगा इति भाषा। तत्पर्य्यायः। ऊषवान् २। इत्यमरः॥ ("तत्र विद्या न वप्तव्या शुभं बीजमिवोषरे"। इति मनुः। २। ११२। ऊषरा मृत्पित्तं कोपयेत्। प्रमाणं यथा॥ "पित्तमूषरा" इति वैद्यकमाधवकृतरोगनिश्चये पाण्ड्वधिकारे॥)

ऊषरजं, क्ली, (ऊषर+जन्+ड।) पांशवलवणम्। रोमकनामायस्कान्तभेदः। इति राजनिर्घण्टः॥

ऊषवान्, [त्] त्रि, (ऊषो विद्यतेऽस्य। ऊष्+मतुप्। मस्य वः।) ऊषरभूमी। इत्यमरः॥

ऊषा, स्त्री, (उष्+क+टाप्।) उषा। अनिरुद्धभार्य्या। इति शब्दरत्नावली॥ (तत्कथा च भागवते १० स्कन्धे ६२ अध्याये तथा हरिवंशे १७४ अध्याये बाणयुद्धे द्रष्टव्या।)

ऊह ङ वितर्के। सन्देहादिविचारे। इति कविकल्पद्रुमः॥ (भ्वादिं-आत्मं-सकं-सेट्।) दीर्घादिः। सन्देहादिविचारस्तर्कः। ङ ऊहते धर्म्मं धीरः। यत्तु समूहन्निव दिग्विकीर्णमिति नैर्व्वाणिरोहाढे चेति परस्मैपदविधानाच्छन्तम्। "अनुक्रममप्यूहति पण्डितो जनः"। इति गणकृतानित्यत्वादिति रमानाथः। वस्तुतस्तु पचादित्वादचि ऊह इवाचरतीति क्वौ साध्यम्। इति दुर्गादासः॥

ऊहः, त्रि, (ऊह+घञ्।) पूर्व्वाप्राप्तस्य उत्क्षेपणम्। तत्पर्य्यायः। अध्याहारः २ तर्कः ३। इत्यमरः॥ वितर्कः ४। वूहः ५ व्यूहः ६ वितर्कणम् ७ अध्याहरणम् ८ ऊहनम् ९ प्रतर्कणम् १०। इति शब्दरत्नावली॥ अपूर्व्वोत्प्रेक्षणम्। इति जैमिनिः॥ असमवेतार्थकपदत्यागपूर्व्वकसमवेतार्थकपदसमभिव्याहारकरणम्। इति श्राद्धतत्त्वटीका॥ साकाङ्क्षवाक्यस्य पदान्तरेण आकाङ्क्षापूरणम्॥ (ऊहनम्। आरोपः। यथा, महाभारते १३। उमामहेश्वरसंवादे १४५। ४३॥
"इमे मनुष्या दृश्यन्ते ऊहापोहविशारदाः।
ज्ञानविज्ञानसम्पन्नाः प्रज्ञावन्तोऽथ कोविदाः" ॥
परीक्षणम्। सिद्धिभेदः॥)

ऊहनी, स्त्री, (ऊह्+ल्युट्+ङीप्।) सम्मार्ज्जनी। इति शब्दरत्नावली॥ झाँटा इति भाषा॥

ऋ

ऋ, ऋकारः। सप्तमस्वरवर्णः। अस्योच्चारणस्थानं मूर्द्धा। ("ऋटुरषाणाम्मूर्द्धा"। इत्युक्तेः। तथाच शिक्षायां "स्युर्मूर्द्धण्या ऋटुरषाः"। तथा च मुग्धबोधे। "ऋत्रयं टठडढणरषा मूर्द्धण्याः"। इति।) स तु ह्रस्वो दीर्घः प्लुतश्च भवति॥ (एवं त्रिधापि उदात्तानुदात्तस्वरितभेदात् नवविधस्ततः प्रत्येकं अनुनासिकाननुनासिकभेदादष्टादशविधः एव।)
"ऋकारं परमेशानि कुण्डली मूर्त्तिमान् स्वयम्।
अत्र ब्रह्मा च विष्णुश्च रुद्रश्चैव वरानने॥
सदाशिवयुतं वर्णं सदा ईश्वरसंयुतम्।
पञ्चवर्णमयं वर्णं चतुर्ज्ञानमयं तथा॥
रक्तविद्युल्लताकारं ऋकारं प्रणमाम्यहम्" ॥
इति कामधेनुतन्त्रम्॥ (वङ्गीयभाषायाम्) तस्य लेखनप्रकारादि यथा।
"ऊर्द्ध्वादधागता वक्रा त्रिकोणा वामतस्ततः।
पुनस्त्वधोदक्षगता मात्रा शक्तिः परा स्मृता॥
मात्रासु ब्रह्मविष्णीशास्तिष्ठन्ति क्रमतः पराः"।
इति वर्णोद्धारतन्त्रम्॥ * ॥ तस्य नामानि यथा।
"ऋः पूर्व्वमुखी वक्रो देवमाता त्रिविक्रमः।
भावभूतिः क्रिया क्रूरा रेचिका नासिका धृतः॥
एकपादशिरो माला मण्डला शान्तिनी जलम्।
कर्णः कामलता मेधो निवृत्तिर्गणनायकः॥
रोहिणी शिवदूती च पूर्णगिरिश्च सप्तमी"।
इति तन्त्रम्॥ (मातृकान्यासेऽस्य दक्षिणश्रवणेऽवस्थितत्वात्तदाख्ययाप्यभिधानम्। यथा, मातृका-